Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# रोगनिर्णयः

प्रो.राधाकान्तठाकुरः
प्रोफेसर ,ज्योतिषविभागः, राष्ट्रीयसंस्कृतविश्वविद्यालयः , तिरुपतिः।

**Article Info**
Volume 7, Issue 1
**Page Number :** 22-24
**Publication Issue :**
January-February-2024
**Article History**
Accepted : 25 Jan 2024
Published : 15 Feb 2024

**शोधसारांशः**- बलवान् लग्नेशः केन्द्रस्थितैः शुभग्रहैः दृश्यते अपि लग्ने गुरुस्तथा केन्द्रे शुभग्रहो वर्तते चेत्तदा जातकः दीर्घायुर्भवति । तस्य रोगशोकजनिता चिन्ता न भवति ।

**मुख्यशब्दाः**- लग्नेशः, जातकः, रोगनिर्णयः, रुजः, रोगः, ग्रहः मृत्योः।

ज्योतिषशास्त्रं सिद्धान्तसंहिताहोरेतिस्कन्धत्रयात्मकमस्ति । तत्र होराशास्त्रे जातकस्य सम्पूर्णजीवनस्य शुभाशुभफलविचारः क्रियते । यथोक्तम् –

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥**[1]

भैषज्यविशेषज्ञस्य वैद्यस्य न केवलमौषधज्ञानमावश्यकमपि तु तेन देशकालविभागादीनामपि ज्ञानं कर्तव्यमपि च रुजः कारणमालोच्यैव रोगस्यौषधं दातव्यमित्यायुर्वेदेप्युक्तम् –

**रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।**
**ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत् ॥**
**यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् ।**
**अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥**
**यस्तु रोगविशेषज्ञः सर्वभेषज्यकोविदः ।**
**देशकालप्रमाणज्ञस्तस्य सिद्धिरसंशयम् ॥**[2]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

शरीरं व्याधिमन्दिरमित्युक्त्या शरीरे कस्मिन् अवयवे रोगः स्यादित्यस्यानुशीलनं ज्योतिषशास्त्रे क्रियते । यत्पिण्डे तद्ब्रह्माण्डे इत्युक्त्यनुगुणं राशिमण्डलरूपं समस्तब्रह्माण्डं कालपुरुषं कल्पितं ततः कालपुरुषस्य अङ्गानि शीर्षतः चरणपर्यन्तं मेषादिद्वादशराशयः कल्पिताः । यथा –

**शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञानि ।**

**ऊरू जान जङ्घे चरणाविति राशयोऽजाद्याः ॥**

**कालनरस्यावयवान् पुरुषाणां चिन्तयेत् प्रसवकाले ।**

**सदसद्ग्रहसंयोगात् पुष्टाः सोपद्रवास्ते च ॥**[3]

अर्थात् कालपुरुषस्य यदङ्गं शुभग्रहेण दृष्टं युतं वा स्यात्तस्य पुष्टता परन्तु यदङ्गमशुभग्रहेण दृष्टं युतं वा स्यात्तस्य विकलता भवेत् ।

मन्त्रेश्वरेण स्वफलदीपिकायां जातकस्य रोगस्य विचारः विस्तरेण कृतः तेनोक्तम् –

**रोगस्य चिन्तामपि रोगभावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः ।**

**रोगेश्वरेणापि तदन्वितैर्वा द्वित्र्यादिसंवादवशाद्वदन्तु ॥**[4]

अर्थात् रोगस्य निर्णयः रोग (षष्ठ)स्थानस्थितात् ग्रहात् व्ययमृत्युस्थानस्थितैर्ग्रहैः अथवा षष्ठेशेन षष्ठेशयुतग्रहेण वा करणीयः।

एवं प्रकारेण ग्रहेणापि शरीरावयवस्य विचारः क्रियते। यथोक्तम् –

**आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी।**

**ज्ञानं सुखं चेन्दुगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम् ॥**[5]

अर्थात् कालनरस्य सूर्यः आत्मा, चन्द्रः मनः, मङ्गलः बलं, बुधः वाणी, गुरुः ज्ञानं सुखञ्च, शुक्रः वीर्यं तथा शनिः दुःखमस्ति । अतः यो ग्रहः बलवान् तदङ्गं पुष्टं यश्च ग्रहः दुर्बलः तदङ्गं दुर्बलं कष्टदं वेति।

अद्यत्वे बहूनामपि हृदयरोगः दृश्यते । तत्र वैद्यनाथेनैवं हृदयरोगो निर्दिष्टः –

**हृन्मूलरोगमुपयाति सुखे फणीशे पापेक्षिते गतबले यदि लग्ननाथे ।**

**शूलभयं तनुपतौ रिपुनीचराशौ भौमसुखे रविसुते यदि पापदृष्टे ॥**[6]

अर्थाद् हृदयरोगो भवति यदा राहुः चतुर्थस्थाने स्यात् लग्नेशः पापदृष्टो बलहीनो वा स्यात् अथवा लग्नेशः शत्रुगृहे नीचराशौ वा स्यात्तत्र कुजः चतुर्थे शनिः पापग्रहदृष्टश्च स्यात्।

एवमेव बहूनामपि उदरे रोगः वायुविकारो दृश्यते । तत्र झोपाख्यजीवनाथेनमेवमुक्तम् –

**पापेन दृष्टे यदि लग्नगेहे शनौ यदा प्लीहनिपीडितश्च ।**

**पापार्दिते लग्नगते शनौ वा सुखेन हीनोऽनिलगोलरोगी ॥**[7]

अर्थात् यदि लग्ने शनिः पापग्रहदृष्टः अस्ति चेत्तदा प्लीहरोगो भवति । लग्नं पापग्रहदृष्टं शनिना युतं वा स्यात्तदा उदरे भूरि वायुगोलं भवति।

एवं प्रकारेण ग्रहेभ्यः रोगनिर्णयः होराशास्त्रे बहुत्र वर्णितोऽस्ति ।

रोगविचारः प्राचीनाचार्यैः विस्तरेण कृतः। तत्र ग्रहः कारणं भवति। रोगस्य भावस्तु षष्ठः भवति। परन्तु केवलं षष्ठभावादेव रोगस्य निर्णयो न भवति। अष्टमस्थानात् अष्टमस्थानं यो ग्रहः पश्यति तस्मात् मृत्योः विचारः क्रियते । उक्तञ्च –

**अष्टमस्थानगे शुक्रे पापग्रहनिरीक्षिते ।**

**वातरोगात्क्षयाद्वापि प्रमेहाद्वा मृतिं वदेत् ॥**[8]

जीवने लग्नेशस्य महत्त्वं वर्तते । अतो हि यदि बलवान् लग्नेशः केन्द्रस्थितैः शुभग्रहैः दृश्यते अपि लग्ने गुरुस्तथा केन्द्रे शुभग्रहो वर्तते चेत्तदा जातकः दीर्घायुर्भवति । तस्य रोगशोकजनिता चिन्ता न भवति। इति।

## सन्दर्भग्रन्थः


1. लघुजातकम् – अध्यायः 1 – श्लोकः 4
2. चरकसंहिता – महारोगाध्यायः – 20 तः 22 श्लोकाः
3. लघुजातकम् – राशिप्रभेदाध्यायः – 4, 5 श्लोकौ
4. फलदीपिका – अध्यायः 14 – श्लोकः 1
5. लघुजातकम् – अध्यायः 2 – श्लोकः 1
6. जातकपारिजातः – अध्यायः 6 – श्लोकः 91
7. भावप्रकाशः – अध्यायः 6 – श्लोकः 10
8. जातकपारिजातः – आयुर्दायाध्यायः – श्लोकः 89